क्रम: । तत: परं मुक्ति: । एतच्च संसारिजीव-
बाहुल्यकथनं मोक्षस्य दुर्लभताद्योतनार्थम् ।
अयञ्च नवधा निर्द्दिष्टो जन्मक्रम: प्रायिक एव ।
तदुक्तमादित्यपुराणे ।
युतक्रमेणापि मानुष्यं प्राप्नुवन्ति पुण्यगौरवात् ।
विचित्रा गतय: पुंसां कर्म्मणां गुरुलाघवै: ॥”
इति तट्टीका ॥

कुयोनिमोक्षणं यथा,—
वाराह उवाच ।
“येन गर्भे न गच्छेत तन्मे शृणु हि माधवि ! ।
कथयिष्यामि ते ह्येवं सर्व्वधर्म्मविनिश्चयम् ॥
कृत्वापि विपुलं कर्म्म आत्मानं न प्रशंसति ।
कुर्व्वति बहुकर्म्माणि शुद्धेनैवान्तरात्मना ॥
कृत्वापि मम कर्म्माणि मत्प्रियाणि वसुन्धरे ! ।
नैव कुर्व्वन्त्यहङ्कारं क्रोधञ्चैव न गच्छति ॥
समं पश्यति चित्तेन लाभालाभविवर्जित: ।
पञ्चानामिन्द्रियाणाञ्च समर्थो निग्रहे रत: ॥
कार्य्याकार्य्ये विजानाति सर्व्वधर्म्मेषु निश्चित: ।
शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च य: ॥
यो दरिद्रो निरालस्य: सत्यवागनसूयक: ।
स्वदारनिरतो नित्यं परदारविवर्जित: ॥
सत्यवादी विशुद्धात्मा नित्यं भागवतप्रिय: ।
संविभागी विशेषज्ञो नित्यं ब्राह्मणवत्सल: ॥
प्रियवादी द्विजानाञ्च मम कर्म्मपरायण: ।
कुयोनिन्तु न गच्छेत मम लोकाय गच्छति ॥”
वियोनिमोक्षणं यथा,—
“अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ! ।
यो वियोनिं न गच्छेत मम कर्म्मपरायण: ॥
जीवहिंसानिवृत्तस्तु सर्व्वभूतहित: शुचि: ।
सर्व्वत्र समतायुक्त: समलोष्टाश्मकाञ्चन: ॥
बाल्ये स्थितोऽपि वयसि शान्तो दान्त: शुभे रत: ।
कृतं नैव विजानाति परेणापहृतं क्वचित् ॥
कृतञ्च संस्मरेत् ह्येतदसत्यञ्च न जल्पति ।
व्यलीकेषु निवृत्तो य: पर्य्येति कृतनिश्चय: ॥
नित्यञ्च धृतिमान् किञ्चित् परोक्षेऽपि न च
क्षिपेत् ।
ऋतुकालेऽभिगच्छेत अपत्यार्थं स्वकां स्त्रियम् ॥
ईदृशास्तु नरा भद्रे ! मम कर्म्मपरायणा: ।
ते वियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि ॥”
तिर्य्यग्योनिमोक्षणं यथा,—
वाराह उवाच ।
“गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे ! ।
तिर्य्यग्योनिगताश्चापि यो न गच्छन्ति किल्बि-
षम् ॥
अगम्याञ्च चतुर्द्दश्यां मैथुनं यो न गच्छति ।
भुक्त्वा परस्य चान्नानि यश्चैव न विकुत्सति ॥
बाल्ये वयस्यपि च यो मम नित्यमनुव्रत: ।
येन केनापि सन्तुष्ट: पितृमातृप्रपूजक: ॥
प्राणेन जीवति च य: प्रविभागी गुणान्वित: ।
अलुब्ध: सर्व्वकार्य्येषु स्वतन्त्रो नित्यसंयत: ॥
विकर्म्म नाभिकर्व्वीत कौमारव्रतसंस्थित: ।
सर्व्वभूतदयायुक्त: सत्त्वेन च समन्वित: ॥
मतिमान्नैव तप्येत परार्थेषु कदाचन ।
ईदृशीं बुद्धिमास्थाय मम कर्म्माणि कुर्व्वते ।
तिर्य्यग्योनिं न गच्छेत मम लोकाय गच्छति ॥”
इति वराहपुराणे योनिगर्भमोक्षणनामाध्याय: ॥

योनिकन्द:, पुं, (योनौ कन्द इव ।) योनिरोग-
विशेष: । तस्य निदानं यथा,—
“दिवास्वप्नादतिक्रोधाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्व्वाताद्या: कुपिता यथा ॥
वाताद्या: कुपिता यथा । यथा निदानकुपिता
वाताद्या: । रूपमाह ।
‘पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
जनयन्ति यदा योनौ नाम्ना कन्द: स योनिज: ॥’
लकुचाकृतिसन्निभं लकुचाकाराकारम् ।
गुडकमत्र विशेष्यं बोद्धव्यम् ॥ * ॥ वातजादि-
भेदेन रूपभेदमाह ।
‘रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्द्दिशेत् ।
दाहरागज्वरयुतं विद्यात् पित्तात्मकन्तु तत् ॥
तिलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् ।
सर्व्वलिङ्गसमायुक्तं सान्निपातात्मकं भवेत् ॥’
अस्य चिकित्सा । योनिशब्दे द्रष्टव्या ।” इति
भावप्रकाश: ॥

योनिजं, त्रि, (योनेर्ज्जायते इति । जन् + ड: ।)
योनिनि:सृतशरीरादिकम् । यथा,—
“सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा ।
योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम् ॥”
इति भाषापरिच्छेद: ॥
“योनिजादीति । योनिजमयोनिजञ्चेत्यर्थ: ।
योनिजमपि जरायुजमण्डजञ्च । जरायुजं मानु-
षादीनां अण्डजं सर्पादीनाम् । अयोनिजं
स्वेदजोद्भिदादिकम् । स्वेदजा: कृमिदंशाद्या: ।
उद्भिदस्तरुगुल्माद्या: । नारकिणां शरीरमप्य-
योनिजम् ।” इति सिद्धान्तमुक्तावली ॥

योनिदेवता, स्त्री, (योनेर्द्देवता ।) पूर्ब्बफल्गुणी-
नक्षत्रम् । इति हेमचन्द्र: ॥

योनिमुद्रा, स्त्री, (योन्याकृतिर्मुद्रा हस्तभङ्गी ।)
भगवत्या: पूजायां प्रदर्शनीयाङ्गुलीरचितयोन्या-
कारमुद्राविशेष: । यथा,—
“पञ्च प्रणामान् कृत्वाथ ॐ ह्रीं श्रीमितिमन्त्रकै: ।
अन्येषां पुरतश्चैव अधिकाख्या यथेच्छया ।
योनिमुद्रां तत: पश्चात् दर्शयित्वा विसर्ज्जयेत् ॥
द्वौ पाणी प्रहतीकृत्य कृत्वा तूत्तानमञ्जलिम् ।
अङ्गुष्ठाग्रद्वयं न्यस्य कनिष्ठाग्रद्वयोस्तत: ॥
अनामिकायां वामस्य तत्कनिष्ठां पुरो न्यसेत् ।
दक्षिणस्यानामिकायां कनिष्ठां दक्षिणस्य च ॥
अनामिकाया: पृष्ठे तु मध्यमे विनियोजयेत् ।
द्वे तर्ज्जन्यौ कनिष्ठाग्रे तदग्रेणैव योजयेत् ॥
योनिमुद्रा समाख्याता देव्या: प्रीतिकरी मता ॥
त्रिवारं दर्शयेदग्रे मूलमन्त्रेण साधक: ।
तां मुद्रां शिरसि न्यस्य मण्डलं विन्यसेत्तत: ॥”
इति कालिकापुराणे ५३ अध्याय: ॥ * ॥
पारिभाषिकयोनिमुद्र यथा । मन्त्रमुक्ता-
वल्याम् ।
“उपविश्यासने मन्त्री प्राङ्मुखो वाप्युदङ्मुख: ।
षट्चक्रं चिन्तयेद्देवि ! प्राणायामपुर:सरम् ॥
चतुर्द्दलं स्यादाधारं स्वाधिष्ठानन्तु षड्दलम् ।
नाभौ दशदलं पद्मं सूर्य्यसंख्यदलं हृदि ॥
कण्ठे स्यात् षोड़शदलं भ्रूमध्ये द्विदलन्तथा ।
सहस्रदलमाख्यातं ब्रह्मरन्ध्रे महापथे ॥
आधारे कन्दमध्यस्थं त्रिकोणमतिसुन्दरम् ।
त्रिकोणमध्ये देवेशि ! कामबीजं सुलक्षणम् ॥
कामबीजोद्भवं तत्र स्वयम्भुलिङ्गमुत्तमम् ।
तस्योपरि पुनर्ध्यायेत् चित्कलां हंसमाश्रिताम् ॥
ध्यायेत् कुण्डलिनीं देवीं स्वयम्भुलिङ्गवेष्टिताम् ।
चित्कलया कुण्डलिनीं तेजोरूपां जगन्मयीम् ॥
आधारादीनि पद्मानि भित्त्वा तेज:स्वरू-
पिणीम् ।
हंसेन मनुना देवीं ब्रह्मरन्ध्रं नयेत् सुधी: ॥
सदाशिवेन देवेशि ! क्षणमात्रं रमेत् प्रिये ! ।
अमृतं जायते देवि ! तत्क्षणात् परमेश्वरि ! ॥
तदुद्भवामृतं देवि ! लाक्षारससमोपमम् ।
तेनामृतेन देवेशि ! तर्पयेत् परदेवताम् ॥
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया ।
आनयेत्तेन मार्गेण मूलाधारं पुन: सुधी: ॥
ततस्तु परमेशानि ! अक्षमालां विचिन्तयेत् ।
चित्रिणी विशतन्वाभा ब्रह्मनाड़ीगतान्तरा ॥
तया संग्रथिता ध्येया साक्षाज्जाग्रत्स्वरूपिणी ।
अनुलोमविलोमेन मन्त्रवर्णविभेदत: ॥
मन्त्रेणान्तरितान् वर्णान् वर्णेनान्तरितं मनुम् ।
कुर्य्याद्वर्णमयीं मालां सर्व्वमन्त्रप्रकाशिनीम् ॥
चरमार्णं मेरुरूपं लङ्घनं नैव कारयेत् ।
सबिन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेत् सुधी: ॥
अष्टोत्तरशतं मूलमन्त्रं ध्यानेन संजपेत् ।
वर्गाणामष्टवर्गेण अष्टवारं जपेत् सुधी: ॥
अ क च ट त प य श इत्येवञ्चाष्टवर्गका: ।
योनिमुद्रा महेशानि ! तव स्नेहात् प्रकाशिता ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति य: ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥”
इति शाक्तानन्दतरङ्गिणी ॥

योनिरोग:, पुं, (योने: रोग: ।) भगन्दर: ॥ (यथा,
सुश्रुते । १ । ४५ ।
“शूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भ-
स्रावरक्तपित्तश्रमक्लमहरम् ॥” * ॥) अस्य
निदानादिर्योनिशब्दे द्रष्टव्य: ॥

योन्यर्श:, [स्] क्ली, (योनिजातमर्श: ।) योनि-
जातरोगविशेष: । तत्पर्य्याय: । कन्दसंज्ञम् २ ।
इति त्रिकाण्डशेष: ॥ (यथा,—
“केचित्तु भूयांसमेव देशमुपदिशन्त्यर्शसां शिश्न-
मपत्यपथं गलमुखनासिकाकर्णाक्षिवर्त्मानि
त्वक्च ।” इति चरके चिकित्सास्थाने अष्टमे
अध्याये ॥)

योषा, स्त्री, (यौति मिश्रीभवतीति । यु मिश्रणे +
बाहुलकात् स: । इत्युज्ज्वलदत्त: । ३ । ६२ ।
स्त्रियां टाप् ।) नारी । इत्यमर: । २ । ६ । २ ॥
(यथा, देवीभागवते । ३ । २५ । ६ ।